MS – 047

**Fourth Semester B.A./B.Sc./B.Com. Examination, May 2011**
**(2006-07 Batch) (Repeaters Scheme)**
**LANGUAGE SANSKRIT (Paper – IV)**
**Champu Ramayanam (Balakanda), Champu Literature Comprehension**

Time : 3 Hours | Max. Marks : 90

***Instructions :*** *1) Answer in* ***Sanskrit/Kannada/English.***
*2) Question No. 7 should be answered in* ***Sanskrit*** *only.*

I. अ) चम्पूकाव्य लक्षणं विलिख्य प्रसिद्धकृतीनां नामानि कविनामानि च निर्दिशत । **10**

**अथवा**

भोजराजस्य देशकाल जीवितान्यधिकृत्य प्रबन्धं लिखत ।

आ) **द्वयोः** लघुटिप्पणीं लिखत ।

1) हरिचन्द्रः ।

2) चम्पू भारत ।

3) वेंकटाध्वरि ।

4) नीलकण्ठविजय चम्पू ।

II. **चतुर्णां** श्लोकानामनुवादं कृत्व भावं विवृणुत । **(5×4=20)**

1) वाचं निशम्य भगवान् स तु नारदस्य
प्राचेतसः प्रवचसां प्रथमः कवीनाम् ।
माध्यंदिनाय नियमाय महर्षिसेव्यां
पुण्यामवाप तमसां तमसां निहत्रीम् ।।

2) मा निषाद । प्रतिष्ठां त्वमगमः शाश्वती समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ।।

**P.T.O.**

www.onlinebu.com

3) प्रह्लादस्य व्यसनमभितं दैत्यवर्गस्य दम्भं

स्तंम्भं वक्षःस्थलमपि रिपोर्योगपद्येन भेत्तुम् ।

बद्ध श्रद्धं पुरुषवपुषामिश्रिते विश्वदृष्टे

दंष्ट्रारोचिर्विशदभुवने रंहसा सिंहवेषे ।।

4) कौसल्यायै प्रथममदिशद्भूपतिः पायसार्धं

प्रादादर्धं प्रणयमधुरं केकयेन्द्रस्य पुत्र्यै ।।

एते देव्यौ तरलमनसः पत्युरालोच्य भावं

स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम् ।।

5) बलेन तपसां लब्धे बलेत्यतिबलेति च ।

विद्येते मयि काकुत्स्थ ! विद्ये ते वितरामि ते ।।

6) त्रैविध्यं श्रूयतां वत्स ! सरितस्त्रिदिवौकसाम् ।

यथोतां हव्यमधन्त्या देवताया इवाध्वरे ।।

III. 'सीताविवाह प्रसङ्गं' वर्णयत । **10**

**अथवा**

गङ्गावतरणं वर्णयत ।

IV. एकस्य परिच्छेदस्य अनुवादं कुरुत । **10**

अथास्मिन्ननपत्यतया द्वयमानमानसे पुत्रार्थे कर्तुं अश्वमेधं विधातुं मन्त्रिभिः समं मन्त्रायमाणे दशरथे सुमन्त्र पहृष्टमना महर्षेरङ्गदेशसंगतावग्रहनिग्रह शौण्डस्य विभण्डक सूनोरवश्यमृष्यश्रङ्गस्य प्रसादात्प्रभवो भविता कुमाराणामिति सनत्कुमारोदीरितं पुरावृत्तमस्मै दशरथाय कथयामास ।

**अथवा**

ततस्तानमरान्प्राह स्म पितामहः । भवन्तस्तावदवतरिष्यतो लक्ष्मीसहायस्य साहायार्थमप्सरः प्रभृतिषु युवतिषु वानराच्छभल्लगोपुच्छनील मुखवेषभृतः प्रथितप्रभावाः प्रजाः प्रजनयेयुरिति । पुरैवे किल मम जृम्भारम्भे संभूतवाञ्जाम्बवानिति । ततस्ते गीर्वाणास्तयाकुर्वन् ।

www.onlinebu.com
http://www.onlinebu.com

V. **द्वयो:** वाक्ययो: ससन्दर्भं विवृणुत । **10**

1) अजीजनत्कन्यारत्नं रत्नगर्भा भगवती ।

2) लोकानन्दमुकुन्दस्य चत्वार इव बाहव: ।

3) स्वप्राणान् रामबाणस्य वीरपाणमकल्पयत् ।

4) रामस्य पादरजसा प्रकृतिं प्रपेदे ।

VI. **द्वयो:** लघुटिप्पणीं लिखत । **10**

1) विष्णुवर्णनम् ।

2) त्रिशङ्कुप्रसङ्ग: ।

3) अहल्या शापविमोचनम् ।

4) याग सरंक्षणम् ।

VII. परिच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत । **10**

हासन मण्डेल 'बेलूरु' इति स्थाने चेन्नकेशवस्वामिन: महान् आलय: वर्तते । विष्णुवर्धनो नाम राजा द्वादश शतके एतदायतनं निर्ममे । शिलाभित्तौ रामायणस्य महाभारतस्य च कथा उत्कीर्णा: । आलयस्य परित: शिल्पा: प्रतिष्ठापिता: । अस्य आलयस्य चारुता वर्णयितुं अशक्या । डा. डी. वी. गुण्डप्प इति कविवरेण्य: अस्य आलयस्य शिल्पकलासौन्दर्यं वर्णायितुं 'अन्त: पुरगीतेगळु' इति काव्यं कन्नडभाषायां रचितवान् ।

**प्रश्ना :**

1) चेन्नकेशवस्वामिन: आलय: कुत्र अस्ति ?

2) चेन्नकेशवस्वामिन: आलय: कदा निर्मितम् ?

3) शिलायित्तौ का: कथा: उत्कीर्णा: ?

4) आलयं परित: के प्रतिष्ठापिता: ?

5) 'अन्त: पुरगीतेगळु' इति काव्य क: रचितवान् ? **10**

**अथवा**

एतेषु **एकमधिकृत्य** संस्कृतभाषया प्रबन्धं लिखत ।

1) परिसर मालिन्यम् ।

2) क्रिकेट क्रीडा ।

3) संस्कृत भाषा ।

www.onlinebu.com